This Question Paper consists of 35 questions and 7 printed pages.
**अस्मिन् प्रश्नपत्रे 35 प्रश्नाः एवम् 7 मुद्रित पृष्ठाः सन्ति ।**

**Sl. No.**

| **Roll No. अनुक्रमाङ्कः** | | | | | | | | | | | | | **Code No. गुढसंख्या** | **63/S/A** |
|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|

**Set /स्तबकः A**

# BHARATIYA DARSHAN
# भारतीयदर्शनम्
# (247)

**Day and Date of Examination**
**(परीक्षादिवसः दिनाङ्कश्च)** ____________________

**Signature of Invigilators**
**(निरीक्षकयोः हस्ताक्षरम्)**
1. ____________________
2. ____________________

**सामान्य निर्देशाः :**

1. अनुक्रमाङ्कः प्रश्नपत्रस्य प्रथमपृष्ठे नूनं लेख्यः।
2. निरीक्ष्यतां यत् प्रश्नपत्रस्य पृष्ठसंख्या प्रश्नानां संख्या च प्रथमपृष्ठस्य प्रारम्भे प्रदत्तसंख्या समाना न वा। प्रश्नक्रमः सम्यग् न वा।
3. वस्तुनिष्ठप्रश्नानाम् (क), (ख), (ग), (घ) एषु विकल्पेषु युक्तम् उत्तरं चित्वा उत्तरपत्रे लेख्यम्।
4. समेषां प्रश्नानाम् उत्तराणि निर्धारितसमये एव लेख्यानि।
5. उत्तरपत्रे आत्मपरिचयात्मकं लेखनम् अथवा निर्दिष्टस्थानं विहाय अन्यत्र क्वापि अनुक्रमाङ्कलेखनं सर्वथा वर्जितमस्ति।
6. स्वस्य उत्तरपत्रे प्रश्नपत्रस्य गुढसंख्या 63/S/A, Set- A नूनं लेख्या।
7. समेषां प्रश्नानाम् उत्तराणि संस्कृतभाषया एव लेख्यानि।

# BHARATIYA DARSHAN

# भारतीयदर्शनम्

# (247)

परीक्षासमयावधिः (Time): होरात्रयम् (3 Hrs)] [पूर्णाङ्काः (Full Marks) : 100

**निर्देशाः** (i) अस्मिन् प्रश्नपत्रे [A] भागे 10, [B] भागे 10, [C] भागे 10, [D] भागे 5 इति आहत्य 35 प्रश्नाः सन्ति ।

(ii) प्रश्नस्य दक्षिणे पार्श्वे संख्यासु (अङ्काः × प्रश्नाः = पूर्णाङ्काः) इति एवम् अङ्कान् निर्दिशति।

(iii) **सर्वे** प्रश्नाः अनिवार्याः ।

[A] दशानां युक्तं विकल्पं चिनुत । [1 × 10 = 10]

**1.** अर्थापत्तिप्रमाणम् एते नाङ्गीकुर्वन्ति ......

(क) पौराणिकाः

(ख) वेदान्तिनः

(ग) भाट्टाः

(घ) नैयायिकाः

**2.** इदं न सौगतं दर्शनम् ......

(क) माध्यमिकम्

(ख) वैभाषिकम्

(ग) सौत्रान्तिकम्

(घ) वैशेषिकम्

3. व्याकरणं वेदस्य किमङ्गमिव भवति?

(क) हस्तौ

(ख) पादौ

(ग) श्रोत्रम्

(घ) मुखम्

4. शौनकशाखा कस्य वेदस्य?

(क) ऋग्वेदः

(ख) यजुर्वेदः

(ग) सामवेदः

(घ) अथर्ववेदः

5. विज्ञानवादिनः के?

(क) माध्यमिकाः

(ख) योगाचाराः

(ग) सौत्रान्तिकाः

(घ) वैभाषिकाः

6. चार्वाकाणाम् गुरूः कः?

(क) शुक्रः

(ख) बृहस्पतिः

(ग) इन्द्रः

(घ) गौतमः

7. योगशास्त्रस्य समानतन्त्रं दर्शनं किम्?

(क) न्यायः

(ख) मीमांसा

(ग) सांख्यम्

(घ) वेदान्तः

8. गोविन्दभाष्यं कमाधारीकृत्य लिखितम्?

(क) उपनिषत्

(ख) भगवद्गीता

(ग) ब्रह्मसूत्रम्

(घ) भागवतम्

9. अद्वैतवेदान्तदिशा अभावस्य प्रत्यक्षत्वं केन सिध्यति?

(क) प्रत्यक्षेण

(ख) शब्देन

(ग) अनुपलब्ध्या

(घ) अर्थापत्त्या।

10. ''जन्माद्यस्य यत:'' इति सूत्रे किम् प्रतिपादयति?

(क) ब्रह्मण: स्वरूपलक्षण्

(ख) ब्रह्मण: तटस्थलक्षणम्

(ग) मायाया: स्वरूपलक्षणम्

(घ) मायाया: तटस्थलक्षणम्

[B] दशानां यथानिर्देशम् उत्तराणि लघूनि लिखत। [2 × 10 = 20]

11. दर्शनशब्दस्य व्युत्पत्तिं लिखत। शास्त्रशब्दस्य व्युत्पत्तिं लिखत। [1 + 1]

12. वेदान्ते प्रस्थानं नाम किम्? कानि प्रस्थानानि? [1 + 1]

13. मुण्डकोपनिषदि विद्या कति उक्ता:? कानि आस्तिकदर्शनानि? [1 + 1]

14. चार्वाकसम्प्रदायस्य नामान्तरद्वयं लिखत।

15. सप्त भङ्ग्यः काः?

16. न्यायमते प्रमाणं कतिविधम्? कानि तानि? [1 + 1]

17. सांख्यदर्शनात् योगदर्शनस्य विलक्षणत्वं केषु स्थलेषु।

18. विशिष्टाद्वैतदर्शने जीवस्य कति भेदाः? के च ते? [1 + 1]

19. सगुणं निर्गुणं ब्रह्म च किम्? [1 + 1]

20. चित्तविक्षेपाः के?

[C] दश अनतिदीर्घोत्तरैः समाधत्त। [4 × 10 = 40]

21. दर्शनभेदेन प्रमाणभेदान् उपन्यस्यत।

22. सांख्ययोगयोः समासेन परिचयः दीयताम्।

23. दश मुख्याः उपनिषदः काः? ताः केषु वेदेषु उपलभ्यन्ते?

24. न्यायमते कारणविषये लघुटिप्पणीं लिखत।

25. प्रकृतेः स्वरूपं समासेन लिखत।

26. मीमांसादर्शनानुसारेण भावनाविषये लघुटिप्पणी लेख्या।

27. अद्वैतवेदान्तानुसारेण मायास्वरूपं समासेन लिखत।

28. ब्रह्मशब्दस्य व्युत्पत्तिविषये टिप्पणीं लिखत।

29. अद्वैतवेदान्तदिशा अज्ञानस्य जगत्कारणत्वं प्रतिपादयत।

30. तितिक्षाविषये लघुटिप्पणीं लिखत।

[D] पञ्च दीर्घोत्तरैः समाधेयाः। [6 × 5 = 30]

31. वैभाषिकाः, सौत्रान्तिकाः, योगाचाराः, माध्यमिकाः चेति सम्प्रदायचतुष्टयविषये समासेन आलोचयत। अथवा, अनेकान्तवादस्य वर्णनां कुरुत।

32. वैशेषिकदर्शनसम्मतगुणेषु यथेच्छं गुणचतुष्टयं सलक्षणं विवृणुत।

33. सांख्यदर्शनाभिमतं सत्कार्यवादं समासेन विवृणुत। अथवा, मीमांसादर्शनानुसारेण विधिभेदान् आलोचयत।

34. अद्वैतवेदान्तमते मोक्षस्वरूपं वर्णयत।

35. ब्रह्मणः तटस्थलक्षणं समासेन निरूपयत।

☯☯☯☯